**दिनाङ्क :**-26.09.2025 **प्रातः** - 06:55

**अथ वार्ताः**

**प्रधानमन्त्री-बिहार-योजना-**

प्रधानमन्त्री नरेन्द्रमोदी अद्य वीडियो कान्फ्रेन्सिङ्ग्-इत्यनेन माध्यमेन बिहारे मुख्यमन्त्री-महिला-रोजगार-योजनायाः उद्घाटनं करिष्यति। अस्मिन् कार्यक्रमे, प्रधानमन्त्री, सम्पूर्णे बिहार्-राज्ये पञ्चसप्तति लक्षाणी यावत् महिलानां बैंक-लेखासु प्रत्यक्षतया दशसहस्ररूप्यकाणि प्रेषयिष्यति। एकस्मिन् वक्तव्ये, पी. एम्. ओ. इत्यनेन उक्तम् यत् बिहार-सर्वकारस्य अस्य उपक्रमस्य उद्देश्यं महिलाः आत्मानिर्भरं कर्तुं, स्व-जीविकायाः अवसराणां च माध्यमेन महिलानां शक्तीकरणं प्रवर्धनं चास्ति इति। इयं योजना समुदायप्रचालिता भविष्यति, तथा च लाभार्थीनां महिलानां कृते स्वसहायता-समूहैः सह योजयित्वा आर्थिकसमर्थनं प्रशिक्षणं च प्रददाति।

पीएम **- वर्ल्ड फ़ूड इंडिया-**

प्रधानमन्त्री नरेन्द्र मोदीः अवदत् यत् भारते खाद्यक्षेत्रे विविधतायाः, आवश्यकतायाः, परिमाणस्य च त्रिगुणशक्तिः अस्ति। गतसायं नवदिल्ल्यां पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य विश्व-खाद्य-भारत- कार्यक्रमं सम्बोधयन् प्रधानमन्त्री अवदत् यत्, विविधतायाः, आवश्यकतायाः, नवान्वेषणस्य च कारणात् भारतं निवेशस्य सर्वाधिकं आकर्षकं गम्यस्थानम् अस्ति। सः अवदत् यत् भारतं वैश्विक-खाद्यसुरक्षायां निरन्तरं योगदानं कुर्वन् अस्ति ।

**जयशङ्कर- जी-20**

डा. एस्. जयशङ्करः न्यूयार्क्-नगरे आयोजितस्य जी- विंशति विदेशमन्त्रिमण्डलस्य सम्मेलने अन्ताराष्ट्रियशान्तेः वैश्विकविकासस्य परस्परसंबंधस्य च विषये अवधानं प्रदत्तवान्। स्वस्य भाषणे डा. जयशङ्करः अवदत् यत् ऊर्जायाः, आहारस्य, उर्वरकस्य च सुरक्षायाः विषये विशेषतः वैश्विक दक्षिण इत्यस्य कृते व्ययः, मुख्यतया युक्रेन्-गाजा-देशयोः वर्तमान-संघर्षैः स्पष्टतया प्रदर्शितः अस्ति इति।

**जयशंकर-ओआरएफ**

विदेशमन्त्री डा. एस्. जयशङ्करः अवदत् यत् अनिश्चिततायाः काले विश्वं आत्म-निर्भरता, प्रौद्योगिकी, बहुध्रुवीयता, दक्षिण-दक्षिणसहयोगं च परस्परं सुदृढं करिष्यति। ह्यः न्यूयार्क्-नगरे वार्षिक-ओ. आर्. एफ्.-समित्याः चर्चायां प्रवदन्, डा. जयशङ्करः अवदत् यत् वैश्विक-कार्यबलस्य उद्भवः भविष्यति यत् समकालीन-आवश्यकतायाः अनुरूपं भविष्यति इति।

**अमितशाह- कोलकाता**

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य कोल्कत्तानगरे त्रीणि दुर्गापूजा-मण्डपानि उद्घाटयिष्यति। सः कोलकाता-नगरस्य लेबुतला-नगरे सन्तोष-मित्र-स्क्वेर्-दुर्गा-पूजा-मण्डपम् उद्घाटयिष्यति। अस्य पूजायाः आकर्षणम् अस्ति आपरेशन् सिन्दूर् इति। सः नगरे सेवक्-सङ्घस्य अपरस्य दुर्गापूजायाः अपि उद्घाटनं करिष्यति। अपराह्ने मंत्री साल्ट् लेक् इत्यत्र ईस्टर्न्-जोनल्-कल्चर्-सेण्टर् ई.ज़ड्. सी. सी. इत्यत्र दुर्गापूजा-उद्घाटन-कार्यक्रमेपि भागं ग्रहीष्यति।

**एशिया-कप्-क्रिकट्-**

क्रिकेट्-क्रीडायां पाकिस्तान-देशः गतरात्रौ दुबई-नगरे पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य एशिया-चषक स्पर्धायाः सुपर्-फोर्-क्रीडायां बाङ्ग्लादेशं एकादश धावनांकैः पराजित्य निर्णायक द्वन्द्वे प्रविष्टम्। अनेन विजयेन, इदानीं रविवासरे निर्णायक द्वन्द्वे पाकिस्तान्-दलं भारतं सम्मुखीकरिष्यति। अवधेयं यत् एशिया-चषक-क्रीडायाः सप्तदश संस्करणेषु प्रथमवारं भारत-पाकिस्तान-देशौ अन्तिमस्पर्धायां सम्मुखे स्तः।

**।।इति वार्ताः।।**